भट्टोजिदीक्षिताभिमतापादानपञ्चम्यर्थविचारः

डॉ. नीरज-कुमार-भार्गवः *

Abstract

[व्याकरणशास्त्रे कारकस्य बहुधा चर्चा गोचरीभवति । कारकस्वरूपेषु विशेषविचाराः भेदाश्च प्राप्यन्ते । अस्मिन् शोधे अपादानकारकविषये आचार्यस्य भट्टोजिदीक्षितस्य मतम् उपन्यस्तम् । आदौ अपादानस्वरूपं प्रतिपाद्य ततः अपादानभेदाः उपस्थापिताः । स्वरूपविचारसमये अपादानविषयिण्याः वाक्यपदीयकारिकायाः अपि समन्वयः प्रदर्शितः ।]

कुञ्चिकाशब्दाः— अपादानम्, पञ्चम्यर्थः, ध्रुवम्, अपायः, कारकम् ।

प्रथमादिभेदेन सुब्विभक्तयः सप्त सन्ति । पुनः कारकोपपदभेदेन सप्तापि विभक्तयः द्वेधा भवन्ति । अत्र अपादाने विहितायाः कारकपञ्चमीविभक्तेः भट्टोजिदीक्षितनये अर्थः कः, अपादानस्य स्वरूपं किम्, अपादानपञ्चमीघटितवाक्यानां शाब्दबोधः कथमित्येते विषयाः प्रतिपाद्यन्ते । तथाहि भट्टोजिदीक्षितमते "अपादाने पञ्चमी" इति सूत्रेण विहितायाः पञ्चम्या अवधिरर्थो वर्तते । अत एव वदति भट्टोजिदीक्षितः प्रौढमनोरमायाम्— "पर्वतात्पततोऽश्वात्पततीत्यत्र तु पर्वतावधिकपतनाश्रयोऽश्वः तदवधिकं देवदत्तादिनिष्ठपतनमर्थः । पञ्चम्यर्थेऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम्, प्रत्ययार्थस्तु क्रियायाम्, स च धर्मी, न तु धर्ममात्रम्, विभक्त्यर्थे विहितस्य बहुव्रीहेर्धर्मिपरताया निर्विवादत्वात् । उद्धृतौदना स्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः" ।[१] शब्दकौस्तुभेऽपि वदति सः— "पर्वतात्पततोऽश्वात्पतति इत्यत्र तु पर्वतावधिकपतनाश्रयो योऽश्वस्तदवधिकं देवदत्ताश्रयं पतनमर्थः । पञ्चमी त्ववधौ शक्ता । तत्राभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम् । प्रत्ययार्थस्तु क्रियायां विशेषणम् । कारकाणां क्रिययैव सम्बन्धात्" ।[२] एवं च पञ्चम्यर्थेऽवधौ इति प्रौढमनोरमास्थेन कथनेन पञ्चमी त्ववधौ शक्ता इति शब्दकौस्तुभोक्तेन कथनेन च भट्टोजिदीक्षितमते अवधिः पञ्चम्यर्थ इति सुस्पष्टमेव । अथ अपादाने पञ्चमी इति सूत्रेण तु अपादाने पञ्चमी भवति । तस्मादपादानं पञ्चम्यर्थ इति वक्तव्यम्, कथमुच्यते अवधिः

---

* सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : neerajbhu85@gmail.com

१ प्रौढमनोरमा, पृ. ७४३

२ शब्दकौस्तुभः, द्वितीयभागः, पृ. ११६

पञ्चम्यर्थ इति चेदुच्यते अपादानं नाम अवधिरेवेति तात्पर्येण तथा प्रोवाच । तच्च अपादानं किमिति चेदुच्यते—

भट्टोजिदीक्षिताभिमतापादानस्वरूपसमीक्षा

भट्टोजिदीक्षितमते "प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्य-विभागाश्रयत्वम् अपादानत्वम्" इति लक्षणं वर्तते अपादानस्य । अपादानं नाम ध्रुवम्, तस्यैव ध्रुवमपायेऽपादानम् इत्यनेनापादान-संज्ञाविधानात् । तच्च किमिति जिज्ञासायां प्रोक्तं भट्टोजिदीक्षितेन—"ध्रुवं स्थिरम् प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयः"[३] इति । एवं चोक्तं लक्षणं सिद्धं भवति भट्टोजिदीक्षितमते । लक्षणोक्तगतिशब्दश्च अपादाननिष्ठविभागानुकूल-कर्तृनिष्ठक्रियायाः बोधकः । तथा च प्रकृत-धातूपात्ता या अपादाननिष्ठविभागानुकूलकर्तृनिष्ठक्रिया तदनाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् अपादानत्वम् इति लक्षणमागतम् । अत्र कर्तृनिष्ठक्रिया च व्यापार एव तदाश्रयस्यैव कर्तृसंज्ञाविधानात् । एवं च प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् अपादानत्वमिति लक्षणं प्रतिफलति । यथा देवदत्तः प्रयागात् वाराणसीं गच्छतीत्यत्र प्रकृतधातुः गमिधातुः तद्वाच्यो व्यापारः संयोगानुकूलव्यापारः तदनाश्रयः प्रयागः किञ्च तादृशव्यापारजन्यविभागाश्रयोऽपि प्रयागः, अतस्तत्र प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वस्य सत्त्वात् भवति प्रयागस्यापादानत्वम् । एवमेव वृक्षात् पत्रं पततीत्यादावपि बोध्यम् । शब्दकौस्तुभे प्राह भट्टोजिदीक्षितः—"ध्रुवमपायेऽपादानम् । अपायो विश्लेषो विभागस्तद्धेतुत्वोपहितो गतिविशेषश्चेह विवक्षितस्तस्मिन्साध्येऽवधिभूतमपादानसंज्ञं स्यात् । वृक्षात्पतति" ।[४]

अत्र प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् अपादानत्वमित्यस्मिन् लक्षणे दलद्वयं विद्यते । तत्र प्रकृतधातु-वाच्यव्यापारानाश्रयत्वमिति विशेषणदलम्, तज्जन्यविभागाश्रयत्वमिति विशेष्यदलम् । अत्र केवलं विभागाश्रयत्वम् अपादानत्वम् इत्युक्तौ तु देवदत्तः प्रयागात् वाराणसीं गच्छतीत्यत्र प्रयाग इव देवदत्तोऽपि

[३] प्रौढमनोरमा, पृ. ७४२

[४] शब्दकौस्तुभः, द्वितीयभागः, पृ. ११६

विभागाश्रयो वर्तते संयोगवद्विभागस्याऽपि द्विष्ठत्वात्। अतस्तस्याऽपि प्रयागवदपादानत्वापत्तिः। अतस्तद्वारणाय प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सतीति देयम्। तथा च देवदत्तस्य विभागाश्रयत्वे अपि प्रकृत-धातुवाच्यव्यापाराश्रयत्वेन नापादानत्वमिति।

अथात्र विभागाश्रयत्वमपादानत्वमितिलक्षणे स्वीकृते दोषो नास्ति। यतोहि प्रकृतोदाहरणे देवदत्तो यथा विभागाश्रयः तथैव प्रकृतधातुवाच्यव्यापाराश्रयोऽपि। एवं च देवदत्तस्य विभागाश्रयत्वादपादानत्वं प्राप्तम्, धातुवाच्यव्यापाराश्रयत्वेन च तस्य कर्तृत्वं प्राप्तम्, तथा च अपादानत्वकर्तृत्वयोः युगपत्प्राप्तौ अपादानमुत्तराणि कारकाणि बाधन्ते इति नियमात् देवदत्तस्य परत्वात्कर्तृत्वमेव स्यात्, अतो विभागाश्रयत्वम् अपादानत्वम् इत्युक्तावपि न दोष इति तु नैव वक्तव्यम्। यतोहि देवदत्तः पचति इत्यादौ विभागानाश्रये कर्तृसंज्ञायाः चारितार्थ्येन 'देवदत्तः प्रयागात् वाराणसीं गच्छति' इत्यत्र विभागाश्रयस्थलेऽपादानसंज्ञा अपवादत्वेन कर्तृसंज्ञाया एव बाधिका स्यादतस्तत्र देवदत्तस्य अपादानसंज्ञा स्यात्, अतस्तत्र दोषवारणाय प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति इति सत्यन्तविशेषणं लक्षणे देयमेव, तथा च न तत्र दोषः, प्रोक्तवाक्ये देवदत्तस्य विभागाश्रयत्वेऽपि प्रकृतधातुवाच्यव्यापारानाश्रयत्वाभावात्। अतः प्रोक्तमपि हरिदीक्षितेन प्रौढमनोरमाव्याख्याने शब्दरत्ने—"कर्त्तर्यतिव्याप्तिवारणाय सत्यन्तम्, अन्यथा कर्तृसंज्ञाया इयमपवादः स्यात्। कर्तृसंज्ञा तु पच्यादियोगे चरितार्था"।[५]

अत्र प्रकृतधातुवाच्यव्यापारानाश्रयत्वम् अपादानत्वम् इत्येवोक्तौ देवदत्तः ग्रामं गच्छतीत्यत्र ग्रामस्यापि गमिधातुवाच्यव्यापारानाश्रयत्वेन तत्रातिव्याप्तिरतस्तद्वारणाय तज्जन्यविभागाश्रयत्वम् इति विशेष्यदलम्। एवं च न तत्र दोषः ग्रामस्य प्रकृतधातुवाच्यव्यापारानाश्रयत्वे अपि विभागाश्रयत्वाभावात्। भणितं च हरिदीक्षितेन लघुशब्दरत्ने—"कर्मणि ग्रामेऽतिव्याप्तिवारणाय विशेष्यम्" इति।[६]

अथ खगो वृक्षं त्यजतीत्यत्र वृक्षः त्यजतिधातुवाच्य-विभागानुकूलव्यापारस्यानाश्रयो वर्तते, किञ्च तादृशव्यापारजन्य-

[५] प्रौढमनोरमाशब्दरत्नम्, पृ. ७४२
[६] प्रौढमनोरमाशब्दरत्नम्, पृ. ७४२

विभागाश्रयोऽपि वर्तते तस्मात्तत्र प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वस्य सत्त्वेन वृक्षस्यापादानसंज्ञा प्राप्ता । अतः प्रदत्तप्रयोगे वृक्षस्यापादानसंज्ञा कथं न भवति इति तु नैव कथनीयम् । यतोहि प्रकृतवाक्ये विभागः त्यजतिधातुवाच्योऽस्ति, किञ्च त्यजतिधातुवाच्यव्यापारजन्योऽपि वर्तते । तस्मात् तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वात् विभागोऽत्र फलमस्ति । एवं च विभागाश्रयत्वात् तस्य अपादानसंज्ञा प्राप्ता विभागरूपफलाश्रयत्वाच्च तस्य कर्मसंज्ञा प्राप्ता, तत्रोभयोः युगपत्प्राप्तौ अपादानमुत्तराणि कारकाणि बाधन्ते इति नियमात् वृक्षस्य कर्मसंज्ञैव भवति न त्वपादानसंज्ञा इति । प्रोक्तमपि "न चैवमपि वृक्षात्त्यजति इति दुर्वारं कर्मसंज्ञया अपादानसंज्ञायाः बाधेन पञ्चम्यसम्भवात्" इति ।[७]

अथ प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् अपादानत्वम् इति स्वीकारे सति धावतः अश्वात् अश्ववाहः पततीत्यत्र अश्वस्य अपादानसंज्ञा न स्यात् तस्य विभागाश्रयत्वेऽपि प्रकृतधावतिधातुवाच्यव्यापाराश्रयत्वात् इति त्वत्र नैव वक्तव्यम्, कथमिति चेदुच्यते अश्वस्य धावतिधातुवाच्यव्यापाराश्रयत्वेन तद्वाच्यक्रियां प्रति अवधित्वाभावेन तं प्रति अपादानत्वाभावेऽपि प्रकृतपततिधातुवाच्य-व्यापारस्य अनाश्रयस्तु धावनविशिष्टोऽपि अश्वो वर्तते, किञ्च तादृशव्यापारजन्यविभागाश्रयोऽपि वर्तते धावनविशिष्टोऽश्वः अतः पततिधातुवाच्यक्रियां प्रति धावनविशिष्टोऽश्वः एवावधिः, तस्मात् तत्क्रियां प्रति भवत्येव अश्वस्य अपादानसंज्ञा । अत एव प्रोक्तमपि भट्टोजिदीक्षितेन धावतः अश्वात् पततीति प्रतीकमुपादाय—"इह क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियां प्रत्यवधित्वं न विरुद्ध्यते" इति ।[८] अत्र प्रकृतधातुपदेन पततिधातुर्विवक्षितोऽस्ति । अत एवोच्यते—

अपाये यदुदासीनं चलं वा यदि वाचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥[९]

अर्थात् अपाये विभागजनकव्यापारे साध्ये यदुदासीनं तादृशव्यापारानाश्रयभूतं तच्चलं वा भवेत् अचलं वा भवेत् तद् ध्रुवमेव,

[७] प्रौढमनोरमा, पृ. ७४३
[८] प्रौढमनोरमा, पृ. ७४३
[९] प्रौढमनोरमा, पृ. ७४३

अतदावेशात् विभागजनकव्यापारानाश्रयत्वात्। तस्मात् चलं ध्रुवमपि अपादानं भवति। अचलमपि अपादानं भवति।

अथैवमपि पर्वतात् पततः अश्वात् अश्ववाहः पतति इत्यत्र पर्वतस्य प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वात् अपादानत्वसिद्धावपि अश्वस्यापादानसंज्ञा न स्यात् तस्य विभागाश्रयत्वेऽपि प्रकृतधातुवाच्यव्यापारानाश्रयत्वाभावात् इति चेदत्र दोषवारणाय व्यापारे विभागे च तत्त्वं निवेश्यते। तथा च लक्षणं भवति— "प्रकृतधातुवाच्यतद्व्यापारानाश्रयत्वे सति तज्जन्यतद्विभागाश्रयत्वम् अपादानत्वम्"। तथा च नोक्तदोषः। तथाहि 'पर्वतात् पततः अश्वात् अश्ववाहः पतति' इत्यत्र पर्वतनिष्ठविभागजनकव्यापारस्याश्रयोऽश्वो वर्तते किन्तु अश्वनिष्ठो यो हि विभागः तज्जनको यो हि अश्ववाहनिष्ठविभागजनकव्यापारस्तस्य त्वनाश्रय एवाश्वः, अत एव तस्यापादानत्वसिद्धिः। यतोहि प्रकृतधातुः पतिधातुः तद्वाच्यो व्यापारः अश्वनिष्ठविभागजनकः अश्ववाहनिष्ठव्यापारः, तादृशव्यापारस्यानाश्रयः अश्वः, किञ्च तादृशव्यापारजन्यो यो हि विभागः तस्याश्रयोऽपि वर्तते। तस्मात्तस्यापादानत्वसिद्धिः। अत एवोच्यते—

पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते॥[१०]

अर्थात् यस्मादश्वादसौ अश्ववाहः पतति सः पततोऽपि अश्वः प्रकृतपतिधातुवाच्याश्ववाहनिष्ठव्यापारानाश्रयत्वे सति तज्जन्य-विभागाश्रयत्वात् ध्रुव एवास्ति, अपि च पततः अश्वस्यापि पतने यस्मात् कुड्यादितः सः पतति तदपि कुड्यादि प्रकृतधातुवाच्याश्वनिष्ठ-व्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वात् ध्रुवम् इष्यते। ततश्च 'पर्वतात् पततः अश्वात् अश्ववाहः पतति' इत्यादौ अचलस्य पर्वतस्य पतनविशिष्टस्याश्वस्य च अपादानत्वं सिध्यति।

एवमेव परस्परस्मान्मेषावपसरत इत्यादावपि बोध्यम्। अत्र हि सृधातोः व्यापारद्वयं प्रतीयते। तत्र एको मेषोऽपरमेषवृत्तिव्यापारस्य अनाश्रयः सन् तज्जन्यविभागाश्रयः। तथैव द्वितीयोऽपि । अतोऽत्र मेषशब्दवाच्यस्य कर्तृसंज्ञा परस्परशब्दवाच्यस्य चापादानसंज्ञा सिध्यति।

[१०] प्रौढमनोरमा, पृ. ७४३

प्रोक्तं च भट्टोजिदीक्षितेन—"परस्परस्मान्मेषावपसरत इत्यत्र तु सृधातुना गतिद्वयस्याप्युपादानाद् एकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न विरुद्ध्यते" इति ।[११] अत एवोच्यते—

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे ।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ॥[१२]

अन्वयः— यद्यपि उभयकर्मजे विभागे उभौ अपि मेषौ अध्रुवौ, तथापि तत्र प्रविभक्ते तु क्रिये विवक्षिते । तस्मादुक्तम्—

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ॥[१३]

अन्वयः— मेषयोः स्वक्रियापेक्षं कर्तृत्वं पृथक् पृथक् मेषयोः मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।

अयमर्थः— यद्यपि उभयकर्मजे मेषद्वयव्यापारजन्ये विभागे द्वावपि मेषौ विभागजनकव्यापाराश्रयत्वाद् अध्रुवौ स्तः, तथापि तत्र मेषद्वयव्यापारजन्यविभागस्थले तयोः द्वयोः मेषयोः क्रिये अत्यन्तं भिन्ने विवक्षिते, तस्मात्तत्र तयोः मेषयोः स्वक्रियां प्रति कर्तृत्वमपि वर्तते इतरमेषक्रियां प्रति तयोः मेषयोः अवधित्वमपि वर्तते ।

अयं भावः— विभागो द्विविधो भवति । अन्यतरकर्मजः उभयकर्मजश्च । तत्र यथा पर्वतात् मेषः अपसरति इत्यन्यतरकर्मजविभागस्थले विभागाश्रयत्वे सति विभागजनकव्यापारानाश्रयत्वात् पर्वतस्य अवधित्वमस्ति । व्यापाराश्रयत्वात् मेषस्य कर्तृत्वं चास्ति । तथैव परस्परस्मात् मेषौ अपसरत इत्यादौ उभयकर्मजविभागस्थले उभौ अपि मेषौ विभागजनकव्यापाराश्रयत्वाद् अध्रुवौ तथापि विभागजनकव्यापारस्य कर्तारौ परस्परं भिन्नौ, तस्मात् कर्तृभेदाद् व्यापारोऽपि भिन्न एवास्ति । तस्माद् एतन्मेषनिष्ठव्यापारस्यानाश्रयः तज्जन्यविभागाश्रयश्च तन्मेषः । अपि च तन्मेषनिष्ठव्यापारस्यानाश्रयः तज्जन्यविभागाश्रयश्च एतन्मेषः । एवं च द्वयोरपि मेषयोः स्वक्रियां प्रति कर्तृत्वमपि वर्तते, अपरमेषक्रियां प्रति अवधित्वमपि वर्तते । एवं च अत्र प्रकृतधात्ववाच्यतद्विभागजनकतद्व्यापारानाश्रयत्वे सति

[११] प्रौढमनोरमा, पृ. ७४३
[१२] वाक्यपदीयतृतीयकाण्डद्वितीयभागः, पृ. ३५८
[१३] वाक्यपदीयतृतीयकाण्डद्वितीयभागः, पृ. ३५८

तद्व्यापारजन्यतद्विभागाश्रयत्वम् अपादानत्वम् इति लक्षणं वक्तुं शक्यते अपादानस्य ।

अथ एवमपि प्रयागात् वाराणसीं गच्छति इत्यादौ सर्वत्रैव विभागाश्रयस्य प्रयागादेः कालिकसम्बन्धेन प्रकृतधातुवाच्यव्यापाराश्रयत्वात् कस्यापि विभागाश्रयस्य अपादानसंज्ञा न स्यादिति त्वत्र नैव शङ्कनीयम् । यतोहि नहि येन केनापि सम्बन्धेन व्यापारानाश्रयत्वं विवक्षितं किन्तु व्यापारतावच्छेदकसम्बन्धेनैव । व्यापारतावच्छेदकसम्बन्धश्च समवाय एव भवति न तु कालिकादिः । एवं च विभागाश्रयस्य प्रयागादेः कालिकसम्बन्धेन व्यापाराश्रयत्वेऽपि समवायसम्बन्धेन व्यापारानाश्रयत्वमस्त्येव । तथा चात्र निर्दुष्टं लक्षणं भवति—"व्यापारतावच्छेदकसम्बन्धेन प्रकृतधात्ववाच्य-तद्विभागजनकतद्व्यापारानाश्रयत्वे सति तद्व्यापारजन्य-तद्विभागाश्रयत्वम् अपादानत्वम्" इति ।

अपादानभेदाः

वैयाकरणानां नये अपादानस्य त्रयो भेदाः सन्ति । तथा चोक्तं वाक्यपदीये—

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधापादानमुच्यते ॥[१४]

अस्यार्थः— अपाये साध्ये यद् ध्रुवम् अन्यस्मिन् अपायेनाविष्टेऽपि अपायानाविष्टमेकरूपम् अपायस्य साधनं तत्रावधिभूतं यत् तदपादानम् । तच्च त्रिविधं भवति निर्दिष्टविषयम् उपात्तविषयम् अपेक्षितक्रियञ्चेति ।

१. निर्दिष्टविषयम्— निर्दिष्टो विषयः प्रयोगभूमिः स्वशब्देनोपात्तो यस्य तत् निर्दिष्टविषयम् एकमपादानम् । यथा ग्रामादागच्छति चैत्रः । अत्र अपायस्य विभागरूपस्य द्विष्ठत्वाद् ग्रामचैत्रावुभावपि अपाये कर्तारौ । तत्र ग्रामोऽचलः, चैत्रस्तु चलः । अत्रागमनं स्वरूपेण जन्यजनकयोरभेदमादाय वाऽपायः । स चात्र साक्षादेव धातुना निर्दिष्टः इत्यतोऽत्र निर्दिष्टविषयमपादानम् । तथा चाह भट्टोजिदीक्षितः—"यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम् । अश्वात् पततीति यथा" इति ।[१५]

---

[१४] वाक्यपदीयतृतीयकाण्डद्वितीयभागः, पृ. ३५२

[१५] शब्दकौस्तुभः, द्वितीयभागः, पृ. ११६

२. उपात्तविषयम्— उपात्तो गुणभावेन प्रधानभावेन वा धात्वर्थेन स्वान्तर्गृहीतोऽपायलक्षणो विषयो येन तदुपात्तविषयम् । अर्थात् क्रियान्तरस्य धात्वर्थस्य गुणभावेन प्रधानभावेन वा यत्रोपात्तोऽपायलक्षणोऽपादानस्य विषयः, तदुपात्तविषयम् । यथा बलाहकाद् विद्योतते । अत्र बलाहकान्निःसृत्य विद्योतते इति । विद्योतमानं बलाहकान्निःसरतीति वार्थः । अत्र निःसरणाङ्गे विद्योतने विद्योतनाङ्गे निःसरणे वा विद्युतिर्वर्तते । तथा चात्र निःसरणरूपोऽपायो धात्वर्थेन विद्योतनेन गुणतया प्राधान्येन वा उपात्त इत्येवमुपात्तविषयं द्वितीयम् अपादानम् । तथा चाह भट्टोजिदीक्षितः—"यत्र तु धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम् । यथा बलाहकाद्विद्योतते इति । निःसरणाङ्गे विद्योतने द्युतिर्वर्तते । यथा वा कूसूलात्पचति इति । आदानाङ्गे पाकेऽत्र पचिर्वर्तते" इति ।[१६]

३. अपेक्षितक्रियम्— अपेक्षिता अपायरूपा क्रिया यस्य तदपेक्षितक्रियं तृतीयमपादानम् । अर्थात् यत्र सर्वथैव क्रियाशब्दस्यानुपलब्धेरश्रुता अनुमीयमाना क्रिया सम्बन्धिषु द्रव्येषु संज्ञाविशेषहेतूनां शक्तिभेदानामाविर्भावे निमित्तत्वाय कल्प्यते तत्र अपेक्षितक्रियम् अपादानम् । यथा कुतो भवान् इति प्रश्नः, पाटलिपुत्रात् इति उत्तरञ्च । तथा चाह भट्टोजिदीक्षितः—"अपेक्षितक्रियं तु तत्, यत्र प्रत्यक्षसिद्धमागमनं मनसि निधाय पृच्छति कुतो भवानिति पाटलिपुत्रादिति चोत्तरयति, अर्थाध्याहारस्य न्याय्यताया उक्तत्वात्" इति ।[१७]

शाब्दबोधः

'चैत्रः ग्रामाद् गच्छति' इत्यत्र चैत्रशब्दस्यार्थः चैत्रः, ग्रामशब्दस्यार्थः ग्रामः, तदुत्तरपञ्चमीविभक्तेरर्थः अवधिः, गमेरर्थः संयोगः तदनुकूल-व्यापारश्च, तदुत्तरतिप्रत्ययस्यार्थः कर्ता । तत्र ग्रामस्य प्रकृत्यर्थस्य प्रत्ययार्थे अवधौ अभेदेनान्वयः, अवधेश्च धात्त्वर्थे व्यापारे स्वनिष्ठावधिता-निरूपकत्वसम्बन्धेनान्वयः । चैत्रस्य तिबर्थे कर्तरि अभेदेनान्वयः, कर्तुश्च व्यापारे निष्ठत्वसम्बन्धेनान्वयः । धात्वर्थफलस्य संयोगस्य अनुकूलत्वसम्बन्धेनान्वयः, ततश्च प्रकृतवाक्यस्य चैत्राभिन्नकर्तृनिष्ठः ग्रामाभिन्नावधिनिरूपकः संयोगानुकूलः व्यापारः । एवमेवान्यत्रापि बोध्यम् ।

[१६] शब्दकौस्तुभः, द्वितीयभागः, पृ. ११६

[१७] शब्दकौस्तुभः, द्वितीयभागः, पृ. ११६

निष्कर्षः

भट्टोजिदीक्षितनये "व्यापारतावच्छेदकसम्बन्धेन प्रकृतधात्ववाच्य-तद्विभागजनकतद्व्यापारानाश्रयत्वे सति तद्व्यापारजन्यतद्विभागाश्रयत्वम् अपादानत्वम्" इति लक्षणं विद्यते । वृक्षात् पत्राणि पतन्तीत्याद्युदाहरणानि सन्ति । इदञ्च निर्दिष्टविषयोपात्तविषयापेक्षितक्रियभेदात् त्रिविधं भवति ।

✶ ✶ ✶

Bibliography

1. *प्रौढमनोरमा* (रत्नप्रभाटीकोपेता) ; भट्टोजिदीक्षितः ; सभापतिशर्मोपाध्यायः (टीकाकारः) वाणीविलास-प्रकाशनम् ; वाराणसी ; १९९७ ।
2. *शब्दकौस्तुभः* ; भट्टोजिदीक्षितः ; चौखम्बा संस्कृत सीरीज आफिस ; वाराणसी ; १९९१ ; द्वितीयः भागः ।
3. *वाक्यपदीयम्* (अम्बाकर्त्रीव्याख्योपेतम्),तृतीयः काण्डः ; भर्तृहरिः ; रघुनाथ-शर्मा (व्याख्याकारः) ; सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ; वाराणसी ; १९९७ ।

✳ ✳ ✳